श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ अष्टाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टाधिकशततमः सर्गः ॥

### श्रीरामेण रावणस्य वधः

अथ संस्मारयामास मातली राघवं तदा।
अजानन्निव किं वीर त्वमेनमनुवर्तसे ॥ **6.108.1** ॥

विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो।
विनाशकालः कथितो यः सुरैः सोऽद्य वर्तते ॥ **6.108.2** ॥

ततः संस्मारितो रामस्तेन वाक्येन मातलेः।
जग्राह स शरं दीप्तं निःश्वसन्तमिवोरगम् ॥ **6.108.3** ॥

यं तस्मै प्रथमं प्रादादगस्त्यो भगवानृषिः।
ब्रह्मदत्तं महद् बाणममोघं युधि वीर्यवान् ॥ **6.108.4** ॥

ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थममितौजसा।
दत्तं सुरपतेः पूर्वं त्रिलोकजयकाङ्क्षिणः ॥ **6.108.5** ॥

यस्य वाजेषु पवनः फले पावकभास्करौ।
शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥ **6.108.6** ॥

जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम्।
तेजसा सर्वभूतानां कृतं भास्करवर्चसम् ॥ **6.108.7** ॥

सधूममिव कालाग्निं दीप्तमाशीविषोपमम्।
नरनागाश्ववृन्दानां भेदनं क्षिप्रकारिणम्॥ **6.108.8** ॥

द्वाराणां परिघाणां च गिरीणां चापि भेदनम्।
नानारुधिरदिग्धाङ्गं मेदोदिग्धं सुदारुणम्॥ **6.108.9** ॥

वज्रसारं महानादं नानासमितिदारुणम्।
सर्ववित्रासनं भीमं श्वसन्तमिव पन्नगम्॥ **6.108.10** ॥

कङ्कगृध्रबकानां च गोमायुगणरक्षसाम्।
नित्यभक्षप्रदं युद्धे यमरूपं भयावहम्॥ **6.108.11** ॥

नन्दनं वानरेन्द्राणां रक्षसामवसादनम्।
वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः॥ **6.108.12** ॥

तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनम्।
द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः॥ **6.108.13** ॥

अभिमन्त्र्य ततो रामस्तं महेषुं महाबलः।
वेदप्रोक्तेन विधिना सन्दधे कार्मुके बली॥ **6.108.14** ॥

तस्मिन् सन्धीयमाने तु राघवेण शरोत्तमे।
सर्वभूतानि सन्त्रेसुश्चचाल च वसुन्धरा॥ **6.108.15** ॥

स रावणाय सङ्क्रुद्धो भृशमायम्य कार्मुकम्।
चिक्षेप परमायत्तः शरं मर्मविदारणम्॥ **6.108.16** ॥

स वज्र इव दुर्धर्षो वज्रिबाहुविसर्जितः।
कृतान्त इव चावार्यो न्यपतद् रावणोरसि॥ **6.108.17** ॥

स विसृष्टो महावेगः शरीरान्तकरः परः।
बिभेद हृदयं तस्य रावणस्य दुरात्मनः॥ **6.108.18** ॥

रुधिराक्तः स वेगेन शरीरान्तकरः शरः।
रावणस्य हरन् प्राणान् विवेश धरणीतलम्॥ **6.108.19**॥

स शरो रावणं हत्वा रुधिरार्द्रकृतच्छविः।
कृतकर्मा निभृतवत् स तूणीं पुनराविशत्॥ **6.108.20**॥

तस्य हस्ताद्धतस्याशु कार्मुकं तत् ससायकम्।
निपपात सह प्राणैर्भ्रश्यमानस्य जीवितात्॥ **6.108.21**॥

गतासुर्भीमवेगस्तु नैर्ऋतेन्द्रो महाद्युतिः।
पपात स्यन्दनाद् भूमौ वृत्रो वज्रहतो यथा॥ **6.108.22**॥

तं दृष्ट्वा पतितं भूमौ हतशेषा निशाचराः।
हतनाथा भयत्रस्ताः सर्वतः सम्प्रदुद्रुवुः॥ **6.108.23**॥

नर्दन्तश्चाभिपेतुस्तान् वानरा द्रुमयोधिनः।
दशग्रीववधं दृष्ट्वा वानरा जितकाशिनः॥ **6.108.24**॥

अर्दिता वानरैर्हृष्टैर्लङ्कामभ्यपतन् भयात्।
हताश्रयत्वात् करुणैर्बाष्पप्रस्रवणैर्मुखैः॥ **6.108.25**॥

ततो विनेदुः संहृष्टा वानरा जितकाशिनः।
वदन्तो राघवजयं रावणस्य च तद्वधम्॥ **6.108.26**॥

अथान्तरिक्षे व्यनदत् सौम्यस्त्रिदशदुन्दुभिः।
दिव्यगन्धवहस्तत्र मारुतः सुसुखो ववौ॥ **6.108.27**॥

निपपातान्तरिक्षाच्च पुष्पवृष्टिस्तदा भुवि।
किरन्ती राघवरथं दुरावापा मनोहरा॥ **6.108.28**॥

राघवस्तवसंयुक्ता गगने च विशुश्रुवे।
साधुसाध्विति वागग्र्या देवतानां महात्मनाम्॥ **6.108.29**॥

आविवेश महान् हर्षो देवानां चारणैः सह।
रावणे निहते रौद्रे सर्वलोकभयङ्करे ॥ **6.108.30** ॥

ततः सकामं सुग्रीवमङ्गदं च विभीषणम्।
चकार राघवः प्रीतो हत्वा राक्षसपुङ्गवम् ॥ **6.108.31** ॥

ततः प्रजग्मुः प्रशमं मरुद्गणा
दिशः प्रसेदुर्विमलं नभोऽभवत्।
मही चकम्पे न च मारुतो ववौ
स्थिरप्रभश्चाप्यभवद् दिवाकरः ॥ **6.108.32** ॥

ततस्तु सुग्रीवविभीषणाङ्गदाः
सुहृद्विशिष्टाः सहलक्ष्मणस्तदा।
समेत्य हृष्टा विजयेन राघवं
रणेऽभिरामं विधिनाभ्यपूजयन् ॥ **6.108.33** ॥

स तु निहतरिपुः स्थिरप्रतिज्ञः
स्वजनबलाभिवृतो रणे बभूव।
रघुकुलनृपनन्दनो महौजा -
स्त्रिदशगणैरभिसंवृतो महेन्द्रः ॥ **6.108.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाधिकशततमः सर्गः ॥